## विभाषा समीपे। (१६/९२०)

अधिकरणैतावत्त्वस्य समीपे विभाषा द्वन्द्वः [1]एकवद् भवति। उपदशं दन्तोष्ठम्, उपदशाः दन्तोष्ठाः। उपदशं मार्दङ्गिकपाणविकम्, उपदशा मार्दङ्गिकपाणविकाः। अव्ययस्य [2]सङ्ख्ययाऽव्ययीभावोऽ[3]पि विहितः (२.१.६/६५२), बहुव्रीहिरपि (२.२.२५/८४३)। तत्रैकवद्भावपक्षेऽव्ययीभावोऽनुप्रयुज्यते, इतरत्र बहुव्रीहिः[4] (म. भा. १.४७७)॥

## स नपुंसकम्। (१७/८२१)

यस्यायमेकवद्भावो विहितः स नपुंसकलिङ्गो भवति द्विगुर्द्वन्द्वश्च। पञ्चगवम्। दशगवम्। द्वन्द्वः खल्वपि — पाणिपादम्। शिरोग्रीवम्। [5]परलिङ्गतापवादो योगः।

[१५६] अकारान्तोत्तरपदो द्विगुः स्त्रियां [6]भाष्यते।

[7]पञ्चपूली। दशरथी।

[१५७] [8]वाऽऽबन्तः [9]स्त्रियामिष्टः।

पञ्चखट्वम्, पञ्चखट्वी।

[१५८] अनो नलोपश्च वा च [10]द्विगुः स्त्रियाम्।

[11]पञ्चतक्षम्, पञ्चतक्षी।

[१५९] पात्रादिभ्यः प्रतिषेधो [12]वक्तव्यः।

पञ्चपात्रम्। चतुर्युगम्। त्रिभुवनम्॥

## अव्ययीभावश्च। (१८/६५९)

अव्ययीभावश्च [13]समासो नपुंसकलिङ्गो भवति। अधिस्त्रि। [14]उपकुमारि। उन्मत्तगङ्गम्। लोहितगङ्गम्। पूर्वपदार्थप्रधानस्यालिङ्गतैव प्राप्ता, अन्यपदार्थप्रधानस्या[15]भिधेयवल्लिङ्गता, अत इदमुच्यते। अनुक्तसमुच्चयार्थश्चकारः।

---

1. न इत्यधिकम् क. 2. सङ्ख्यायाः क, सङ्ख्यायाम् ह. 3. अपि नास्ति इ. 4. प्रयुज्यते इत्यधिकम् क. 5. परवल्लिङ्गापवादोऽयम् क. ड. फ. ह. 6. इष्यते ड. 7. दशपूली, पञ्चरथी क. ड. फ. ह. 8. टाबन्तः क. ड. 9. स्त्रियामिष्टः नास्ति ड. इ. फ. 10. द्विगुः नास्ति ड. 11. दशतक्षम्, दशतक्षी क. ड. 12. वक्तव्यः नास्ति ह. 13. समासो नास्ति फ. 14. अधिकुमारि क. ड. फ. 15. अभिधेयवल्लिङ्गम् ब, अभिधेयलिङ्गता न्या.